# ॥ भाषासम्बन्धी सुभाषितानि ॥

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥१॥

पुरे ग्रामे गृहे कुट्यां बालो वृद्धो युवापि च ।
करोतु संस्कृताभ्यासं प्राप्नोतु ज्ञानसम्पदम् ॥२॥

भाशासु मधुरा मुख्या दिव्या गीर्वाणभारती ।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् ॥३॥

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥४॥

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥५॥

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥६॥

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥७॥

अव्याकरणमधीतं भिन्नद्रोण्या तरङ्गिणीतरणम् ।
भेषजमपथ्यसहितं त्रयमिदमकृतं वरं न कृतम् ॥८॥

यद्यपि बहु नाधीषे ग्रन्थान् तथापि पठ पुत्र व्याकरणम् ।
सकलः शकलो मा भूत् स्वजनः श्वजनः सकृत् शकृत् ॥९॥

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टाः हलः प्रोक्ता निबोधानुप्रदानतः ॥१०॥

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥११॥

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥१२॥

एकमात्रो भवेत् ह्रस्वः द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयः व्यञ्जनं त्वर्धमात्रकम् ॥१३॥

चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥१४॥

प्रत्ययाः शिवसूत्राणि आदेशा आगमास्तथा ।
धातुपाठो गणेपाठ उपदेशाः प्रकीर्तिताः ॥१५॥

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥१६॥

एकोऽल्पार्थे प्रधाने च प्रथमे केवले तथा ।
साधारणे समानेऽपि सङ्ख्यायां च प्रयुज्यते ॥१७॥

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य ॥१८॥

लट्वर्तमाने लेट्वेदे भूते लुङ् लङ् लिटस्तथा ।
विध्याशिषोस्तु लिङ्लोटौ लृङ्लृटौ लुट्भविष्यति ॥१९॥

प्रपरापसमन्ववनिर्दुरभि व्यधिसूदतिनिप्रतिपर्यपयः ।
उप-आङिति विंशतिरेष सखे उपसर्गविधिं कथितं कविना ॥२०॥

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार संहार विहार परिहारवत् ॥२१॥

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा ॥२२॥

भ्वाद्यदादि जुहोत्यादि दिवादि स्वादिरेव च ।
तुदादिश्च रुधादिश्च तनक्र्यादि चुरादयः ॥२३॥

विद–ज्ञाने–वेत्ति विद–सत्तायां–विद्यते ।
विद–विचारणे–विन्ते विद–प्राप्तौ–विन्दते ॥२४॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥२५॥

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥२६॥

सानुस्वारश्च दीर्घा च विसर्गा च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि च ॥२७॥

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुः पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥२८॥

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरुः षष्ठं च पादानां चतुर्णां स्यादनुष्टुभिः ॥२९॥

आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥३०॥

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥३१॥

निकटस्थं गरीयांसं अपि लोको न मन्यते ।
पवित्रमपि यन्मर्त्या न नमस्यन्ति जाह्नवीम् ॥३२॥

शार्मण्यदेशजातेन गोमान्तकनिवासिना ।
मोक्षमुल्लरभट्टेन भाष्यमेतद्विशोधितम् ॥३३॥

श्रीरामः शरणं समस्तजगतां रामं विना का गतिः
रामेण प्रतिहन्यते कलिमलं रामाय कार्यं नमः ।
रामात् त्रस्यति कालभीमभुजगो रामस्य सर्वं वशे
रामे भक्तिरखण्डिता भवतु मे राम त्वमेवाश्रयः ॥३४॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः ।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम ! मामुद्धर ॥३५॥

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलाऽस्तु भगवन् हे कृष्ण तुभ्यं नमः ॥३६॥

# ॥ शास्त्रसम्बन्धी सुभाषितानि ॥

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥१॥

धारणाद्धर्ममित्याहुः धर्मो धारयते प्रजाः ।
यत् स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥२॥

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥३॥

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥४॥

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥५॥

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥६॥

जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥७॥

शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते ।
शंसनं भूतवस्त्वेकविषयं नक्रियापरम् ॥८॥

ईश–केन–कठ–प्रश्न–मुण्ड–माण्डूक्य–तित्तिरिः ।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥९॥

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥१०॥

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥११॥

पतञ्जलेर्जैमिनेश्च व्यासस्य कपिलस्य च ।
कणादस्याक्षपादस्य दर्शनानि षडेव हि ॥१२॥

श्रुति स्मृत्योः परं वादे श्रुतिरेव गरीयसी ।
श्रुत्योः परस्परं वादे न्यायोपेता गरीयसी ॥१३॥

आरम्भवादः कणाक्षपक्षः सङ्घातवादस्तु भदन्त पक्षः ।
साङ्ख्यादि पक्षस्तु परिणामवादः वेदान्तपक्षस्तु विवर्तवादः ॥१४॥

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥१५॥

आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥१६॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति लक्षणानां तु पञ्चकम् ॥१७॥

भकारो भक्तिपूर्वेण गकारो गर्ववर्जितः ।
वकारो वाक्यसम्पन्नः तकारस्तत्त्वनिर्णयः ॥१८॥

वेदोपनिषदां साराज्जाता भागवती कथा ।
अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ॥१९॥

मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्किर्नमोऽस्तु ते ॥२०॥

वाल्मीकिगिरिसम्भूता रामसागरगामिनी ।
पुनातु भुवनं पुण्या रामायणमहानदी ॥२१॥

कूजन्तं राम-रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥२२॥

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
इति भारतमाख्यानं कृपया मुनिना कृतम् ॥२३॥

भारतं सर्ववेदाश्च तुलामारोपितः पुरा ।
देवैर्ब्रह्मादिभिस्सर्वैः ऋशिभिश्च समन्वितैः ॥२४॥

भाति सर्वेषु वेदेषु रतिः सर्वेषु जन्तुषु ।
तरणं सर्वतीर्थानां तेन भारत उच्यते ॥२५॥

महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥२६॥

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥२७।

भारतं सर्वशास्त्रेषु भारते गीतिका वरा ।
विष्णोः सहस्रनामापि ज्ञेयं पठ्यं च तद्द्वयम् ॥२८॥

भारतं पञ्चमो वेदः सुपुत्रः सप्तमो रसः ।
दाता पञ्चदशं रत्नं जामाता दशम ग्रहः ॥२९॥

अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥३०॥

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ शान्तेति रसा नव प्रकीर्तिताः ॥३१॥

काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।
तत्रापि हि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥३२॥

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥३३॥

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥३४॥

षड्जं मयूरो वदति गावस्त्वृषभभाषिणः
अजाविकं तु गान्धारं क्रौञ्चः क्वणति मध्यमम् ।
पुष्पसाधारणे काले पिकः कूजति पञ्चमं
धैवतं हेषते वाजी निषादं बृंहते गजः ॥३५॥

आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ।
ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिस्समानाः ॥३६॥

# ॥ ज्ञानसम्बन्धी सुभाषितानि ॥

गुणातीतं गुवर्णं च रूपातीतं रुवर्णकम् ।
गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः ॥१॥

गुरवो बहवस्सन्ति शिष्यवित्तापहारकाः ।
दुर्लभस्सगुरुर्लोके शिष्यचित्तापहारकाः ॥२॥

आचिनोति च शास्त्रार्थान् आचारे स्थापयत्यपि ।
स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते ॥३॥

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम् ॥४॥

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ॥५॥

शैशवे अभ्यस्त विद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥६॥

काकदृष्टिः बकध्यानं श्वाननिद्रा तथैव च ।
अल्पाहारो जीर्णवस्त्रं विद्यार्थी पञ्चलक्षणम् ॥७॥

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥८॥

दैवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥९॥

जनिता च उपनेता च येन विद्योपदिश्यती ।
अन्नदाता भयत्राता पन्चैते पितरः स्मृताः ॥१०॥

देहो देवालयः प्रोक्तो जीवो देवः सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ॥११॥

जन्मनाज्जायते शूद्रः संस्काराद्द्विज उच्यते ।
वेदपाठाद्भवेद्विप्रः ब्रह्म जानाति ब्राह्मणः ॥१२॥

अध्यापनम् अध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत् ॥१३॥

भारोऽविवेकिनः शास्त्रं भारो ज्ञानं च रागिणः ।
अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः ॥१४॥

पठन्ति वेदशास्त्राणि बोधयन्ति परस्परम् ।
न जानन्ति परमतत्त्वं दर्वी पाकरसं यथा ॥१५॥

वेदागम पुराणज्ञः परमार्थं न वेत्तियः ।
विडम्बकस्य तस्यैव तत्सर्वं काकभाषितम् ॥१६॥

अनेकानि च शास्त्राणि स्वल्पायुर्विघ्नकोटयः ।
तस्मात्सारं विजानीयात्क्षीरं हंस इवाम्भसि ॥१७॥

अचिन्त्याः खलु ये भावाः न तांस्तर्केण योजयेत् ।
अप्रतिष्ठित तर्केण कस्तीर्णः संशयाम्बुधीम् ॥१८॥

अस्थिरं जीवितं लोके अस्थिरं धन–यौवनम् ।
अस्थिरं पुत्र–दाराश्च धर्म–कीर्तिद्वयं स्थिरम् ॥१९॥

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ॥२०॥

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ॥२१॥

चतुर्णामाश्रमाणां हि गृहस्थः श्रेष्ठ उच्यते ।
गृहस्थाच्च गृहं श्रेष्ठं गृहाच्च श्रेष्ठवताः स्त्रियः ॥२२॥

यथा वायुं समाश्रित्य वर्तन्ते सर्व जन्तवः ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥२३॥

आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे ।
साधोः सङ्गमुपासते च सततं धन्यो गृहस्थाश्रमः ॥२४॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥२५॥

संतोषस्त्रिषु कर्तव्यः स्वदारे भोजने धने ।
त्रिषु चैव न कर्तव्योऽध्ययने तपदानयोः ॥२६॥

अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥२७॥

अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥२८॥

कृष्णो भोगी शुकस्त्यागी नृपौ जनक-राघवौ ।
वसिष्ठः कर्मनिरतः सर्वे ते ज्ञानिनः स्मृताः ॥२९॥

सुप्तेरुत्थाय सुप्त्यन्तरं ब्रह्मैकं परिचिन्त्यताम् ।
आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया ॥३०॥

न विप्रपादोदकपङ्किलानि न वेदशास्त्रध्वनिगर्जितानि ।
स्वाहास्वधाकारविवर्जितानि श्मशानतुल्यानि गृहाणि तानि ॥३१॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥३२॥

मातासमं नास्ति शरीरपोषणं विद्यासमं नास्ति शरीरभूषणम् ।
पूजासमं नास्ति शरीरतोषणं चिन्तासमं नास्ति शरीरशोषणम् ॥३३॥

सम्पूर्णकुम्भो न करोति शब्दं अर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वं जल्पन्ति मूढास्तु गुणैर्विहीनाः ॥३४॥

सत्यं तपो ज्ञानमहिंसता च विद्वत्प्रेमं च सुशीलता च ।
एतानि यो धारयते स विद्वान्न केवलं यः पठते स विद्वान् ॥३५॥

मृत्पिण्डमेको बहुभाण्डरूपः सुवर्णमेकं बहुभूषणानि ।
गोक्षीरमेकं बहुधेनुजातम् एकः परात्मा बहुदेहवर्ती ॥३६॥

# ॥ चित्रकाव्यम् ॥

नदीजलङ्केशवनारिकेतुः नगाह्वयो नाम नगारिसूनुः ।
एषोऽङ्गनावेषधरः किरीटी जित्वावयं नेश्यति चाद्य गावः ॥१॥

(कूटश्लोक = different meaning through pronunciation) Meaning: O Bheeshma, the one who is holding the flag of the one who destroyed the garden of the lord of Lanka, the one having the name of a tree, the son of the enemy of hill, the one wearing a crown has come in the disguise of a lady, he wins us and takes away the cows.

अर्जुनस्य इमे बाणाः नेमे बाणाः शिखण्डिनः ।
छिन्दन्ति मम गात्राणि माघमासेगवामिव ॥२॥

(कूटश्लोक = different meaning through association) Meaning: These arrows are not of Shikhandi, these arrows are of Arjuna. They are piercing my body like baby crab piercing the mother crab from within.

हनूमति हतारामे वानरा हर्षनिर्भराः ।
रुदन्ति राक्षसाः सर्वे हा हारामो हतो हतः ॥३॥

(कूटश्लोक = different meaning through conjunction) Meaning: When the garden was destroyed by Hanuman, the monkeys started dancing with joy, and all the demons cried saying that 'the garden is destroyed, the garden is destroyed'.

केशवं पतितं दृष्ट्वा पाण्डवा हर्षनिर्भराः ।
रुदन्ति कौरवाः सर्वे हाहा केशव केशव ॥४॥

(कूटश्लोक = different meaning of words) Meaning: By seeing the corpse falling into the water, the fishes started dancing with joy, and all the crows cried saying that 'alas, corpse in water, corpse in water'.

कः खगौघाङचिच्छौजा झाञ्ज्ञोऽटौठीडडण्ढणः ।
तथोदधीन् पफर्बाभीर्मयोऽरिल्वाशिषां सहः ॥५॥

(वर्णचित्र = all the consonants) Meaning: Who is he, the lover of birds, pure in intelligence, expert in stealing the strength of others, leader among the destroyers of the enemies, the steadfast, the fearless, the one who filled the ocean? He is the king Maya, the repository of the blessings that can destroy the foes.

देवानां नन्दनो देवो नोदनो वेदनिन्दिनाम् ।
दिवं दुदाव नादेन दाने दानवनन्दिनः ॥६॥

(वर्णचित्र = only three consonants) Meaning: The God who causes pleasure to the other gods and pain to the opponents of the vedas, filled the heavens with a loud sound as he killed the demon (Hiranyakashyapa).

भूरिभिर्भारिभिर्भीराभूभारैरभिरेभिरे ।
भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥७॥

(वर्णचित्र = only two consonants) Meaning: The fearless elephant, who was like a burden to the earth because of its heavy weight, whose sound was like a kettle-drum, and who was like a dark cloud, attached the enemy elephant.

न नोननुन्नो नुन्नेनो नाना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥८॥

(वर्णचित्र = only one consonant) Meaning: A man is not a man who is wounded by a low man. Similarly, he is also not a man who wounds a low man. The wounded one is not considered to be wounded if his master is unwounded. And he who wounds a man who is already wounded, is not a man.

दाददो दुद्ददुद्दादी दाददो दूददीददोः ।
दुद्दादं दददे दुद्दे दादाददददोऽददः ॥९॥

(वर्णचित्र = only one consonant) Meaning: Shree Krshna, the giver of every boon, the scourge of the evil-minded, the purifier, the one whose arms can annihilate the wicked who cause sufferings to others, shot his pain-causing arrow at the enemy.

जजौजोजाजिजिज्जाजी तं ततोऽतिततातत्तुत् ।
भाभोऽभीभाभिभूभाभूरारारिररिरीररः ॥१०॥

(वर्णचित्र = one consonant in each quarter) Meaning: Balarama, the great warrior and winner of great wars, resplendent like Shukra and Brhaspathi, the destroyer of wandering enemies, went to the battle like a lion stopping the movement of his foes, who were endowed with a four-fold army.

अगा गाङ्गाङ्गकाकाकगाहकाघककाकहा ।
अहाहाङ्क खगाङ्कागकङ्काघखगकाकक ॥११॥

(स्थानचित्र = only gutturals) Meaning: O you, who bathes in the tortuous current of the rippling Ganga, you have no acquaintance with the sorrowful sound of the suffering world; you have the ability to go till the Meru mountain; you are not under the control of the crooked senses. You, being the dispeller of sins, have come on this land.

क्षितिस्थितिमितिक्षिप्तिविधिविन्निधिसिद्धिलिट् ।
मम त्र्यक्ष नमद्दक्ष हर स्मरहर स्मर ॥१२॥

(स्वरचित्र = one vowel in each half) Meaning: O Lord Shiva, the possessor of three eyes, the knower of existence, measurer and destroyer of the earth, enjoyer of the eight-fold superhuman power and nine treasures of Kubera, you who killed Daksha and Kamadeva, O Lord, do remember me.

उरुगुं घुगुरुं युत्सु चुक्रुशुस्तुष्टुवुः पुरु ।
लुलुभुः पुपुषुर्मुत्सु मुमुहुर्नु मुहुर्मुहुः॥१३॥

(स्वरचित्र = only one vowel) Meaning: The gods took refuge in Brhaspathi, the lord of speech, the preceptor of the gods in heaven, when they went for the battle. They prayed so that he would remain happy and strong, and not withdraw into unconsciousness, again and again.

यायायायायायायायायायायायायायाया ।
यायायायायायायायायायायायायायाया ॥१४॥

(स्वरचित्र = one vowel only) Meaning: The sandals which adorn the Lord, which help in attainment of all that is good and auspicious, which give knowledge, which cause the desire, which remove all that is hostile, which have attained the Lord, which are used for going and coming from one place to another, by which all places of the world can be reached, these sandals are for Lord Vishnu.

बकुलकलिकाललामनि कलकण्ठीकलकलाकुले काले ।
कलया कलावतेऽपि हि कलयति कलितास्त्रतां मदनः ॥१५॥

(अमिता = same letters) Meaning: Madana, the god of love, uses even the spots of the moon as his beautiful weapon at the time when the Bakula plant shines with new buds and when the cuckoos and women with melodious voices fill the air with their enchanting sounds.

सभासमानासहसापरागात् सभासमाना सहसा परागात् ।
सभासमाना सहसापरागात् सभासमाना सहसापरागात् ॥१६॥

(अमिता = same letters) <u>Meaning</u>: The beautiful assembly of the people inseparably connected with each other went away quickly from that mountain. This assembly was bright with lustre, pride, jubilation and a will to annihilate the enemies. It was also shining with brilliant people. Because of the month Margasheersha, the atmosphere was filled with the dust caused by the rushing assembly which was adorned by the people of the same lustre who were annihilators of the enemies.

वारणागगभीरा सा साराभीगगणारवा ।
कारितारिवधा सेना नासेधावरितारिका ॥१७॥

(गतिचित्र = palindrome) <u>Meaning</u>: It is very difficult to face this army which is endowed with elephants as big as mountains. This is a very great army and the shouting of frightened people is heard. It has slain its enemies.

निशितासिरतोऽभीको न्येजतेऽमरणारुचा ।
चारुणा रमते जन्ये को भीतो रसिताशिनि ॥१८॥

(गतिचित्र = palindrome) <u>Meaning</u>: O immortals, indeed, the lover of sharp swords, the fearless man does not tremble like a frightened man in this battle full of beautiful chariots and demons who are devourers of men.

वाहनाजनि मानासे साराजावनमा ततः ।
मत्तसारगराजेभे भारीहावज्जनध्वनि ॥१९॥ – १

(गतिचित्र = palindrome) <u>Meaning</u>: And after this, that great army, which is capable of destroying the pride of the enemies and which has never experienced defeat, marched towards the enemy with strong and maddened elephants and people roaring in enthusiasm and jubilation.

निध्वनज्जवहारीभा भेजे रागरसात्तमः ।
ततमानवजारासा सेना मानिजनाहवा ॥१९॥ – २

(गतिचित्र = palindrome) <u>Meaning</u>: That great army, with majestic and trumpeting elephants of high speed, and people filling the battlefield with their jubilant roar, suddenly became ferocious in anger in that battle of proud heroes.

तं भूसुतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम् ॥२०॥

(गतिचित्र = palindrome) <u>Meaning</u>: I pay my homage to him who released Seetha, whose laughter is deep, whose embodiment is grand, and from whom mercy and splendour arise everywhere. (Reverse order) I bow down before Krshna, the descendent of Yadava family, who is the Lord of the sun as well as the moon, who liberated even her who wanted to bring an end to his life, and who is the soul of this entire universe.

काङ्क्षन्पुलोमतनयास्तनपीडितानि वक्षःस्थलोत्थितरयाञ्चनपीडितानि ।
पायादपायभयतो नमुचिप्रहारी मायामपास्य भवतोऽम्बुमुचां प्रसारी ॥२१॥

(चित्रबन्ध = geometric pattern) <u>Meaning</u>: May Indra, who uses the thunder-bolt as his weapon, who disperses the clouds in the sky, who desires to embrace and enjoy the pleasures of the bosoms of his consort Shachee, the daughter of the demon Puloma, may that Indra, having removed all illusions, protect you from the fear of all dangers and misfortunes.

सा सेना गमनारम्भे रसेनासीदनारता ।
तारनादजना मत्तधीरनागमनामया ॥२२॥

(चित्रबन्ध = geometric pattern) <u>Meaning</u>: That army was very efficient and as it moved, the warrior heroes were very alert and did their duties with great concentration. The soldiers in that army made a loud sound. The army was adorned with intoxicated and restive elephants. No one was there with any thought of pain.

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा ।
काकारेभभरेऽकाका निस्वभव्यव्यभस्वनि ॥२३॥

(सर्वतोभद्र = magic square) <u>Meaning</u>: O man who desires war! This is that battlefield which excites even the gods, where the battle is not of words. Here people fight and stake their lives not for themselves but for others. This field is full of herds of maddened elephants. Here those who are eager for battle and even those who are not very eager, have to fight.

असितगिरिसमं स्यात्कज्जलं सिन्धु पात्रं सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ॥२४॥

**<u>Meaning</u>**: Perhaps taking the dark mountain as ink, ocean as the pot, branch of the Kalpatharu as the pen and earth as the leaf, even if Sharada writes forever, even then, O Lord, the boundaries of Your glory cannot be found!